

# श्री रुद्रं चमकम्-ॐ अग्नाविष्णो सजोषसेमावर्धंतु

https://www.chalisa.online

|| श्री रुद्रं चमकम् ||

ॐ अग्नाविष्णो सजोषसेमावर्धंतु वां गिरः । द्युम्नैर्वाजेभिरागतम् । वाजश्च
मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च
मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च
मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे
चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे
जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽंगानि च मेऽस्थानि च मे
परूग्ंषि च मे शरीराणि च मे ॥ 1 ॥
जैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽंभश्च मे जेमा च
मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं
च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च
मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च
मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं
च म ऋद्धिश्च मे क्लुप्तं च मे क्लुप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ 2 ॥
शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे
श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यंता च मे धर्ता च
मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे
सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च
मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च
मे सूषा च मे सुदिनं च मे ॥ 3 ॥
ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च
मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे
पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं
च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च
मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे
मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥ 4 ॥
अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च
मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च
म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च
मे पशव आरण्याश्च यज्ञेन कल्पंतां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च
मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे
गतिश्च मे ॥ 5 ॥
अग्निश्च म इंद्रश्च मे सोमश्च म इंद्रश्च मे सविता च म इंद्रश्च मे सरस्वती
च म इंद्रश्च मे पूषा च म इंद्रश्च मे बृहस्पतिश्च म इंद्रश्च मे मित्रश्च
म इंद्रश्च मे वरुणश्च म इंद्रश्च मे त्वष्ठा च म इंद्रश्च मे धाता च म इंद्रश्च
मे विष्णुश्च म इंद्रश्च मेऽश्विनौ च म इंद्रश्च मे मरुतश्च म इंद्रश्च मे
विश्वे च मे देवा इंद्रश्च मे पृथिवी च म इंद्रश्च मेऽंतरिक्षं च म इंद्रश्च
मे द्यौश्च म इंद्रश्च मे दिशश्च म इंद्रश्च मे मूर्धा च म इंद्रश्च मे प्रजापतिश्च
म इंद्रश्च मे ॥ 6 ॥
अग्ंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाग्ंशुश्च मेऽंतर्यामश्च
म ऐंद्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च
मे मंथी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च
मेऽतिग्राह्याश्च म ऐंद्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेंद्रश्च
म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च
मे ॥ 7 ॥
इध्मश्च मे बर्हिश्च मे वेदिश्च मे दिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे
ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि
च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च
मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ 8 ॥
अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी
च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरंगुलयो दिशश्च मे यज्ञेन कल्पंतामृक्च
मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च
मेऽहोरात्रयोर्-दृष्ट्या बृहद्रथंतरे च मे यज्ञेन कल्पेतां ॥ 9 ॥
गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवीच मे दित्यवाट् च मे दित्यौही
च मे पंचाविश्च मे पंचावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च
मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे
वेहच्च मेऽनड्वां च मे धेनुश्च म आयुर्-यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम्-अपानो
यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्-यज्ञेन कल्पताग् श्रोत्रं यज्ञेन
कल्पतां मनो यज्ञेन कल्पतां वाग्-यज्ञेन कल्पताम्-आत्मा यज्ञेन कल्पतां यज्ञो
यज्ञेन कल्पताम् ॥ 10 ॥
एका च मे तिस्रश्च मे पंच च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पंचदश
च मे सप्तदश च मे नवदश च म एकविग्ंशतिश्च मे त्रयोविग्ंशतिश्च मे पंचविग्ंशतिश्च
मे सप्त विग्ंशतिश्च मे नवविग्ंशतिश्च म एकत्रिग्ंशच्च मे त्रयस्त्रिग्ंशच्च
मे चतस्-रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विग्ंशतिश्च मे चतुर्विग्ंशतिश्च
मेऽष्टाविग्ंशतिश्च मे द्वात्रिग्ंशच्च मे षट्-त्रिग्ंशच्च मे चत्वारिग्ंशच्च
मे चतुश्चत्वारिग्ंशच्च मेऽष्टाचत्वारिग्ंशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च
सुवश्च मूर्धा च व्यश्नियश्चांत्यायनश्चांत्यश्च भौवनश्च भुवनश्चाधिपतिश्च
॥ 11 ॥
ॐ इडा देवहूर्-मनुर्-यज्ञनीर्-बृहस्पतिरुक्थामदानि शग्ंसिषद्-विश्वे-देवाः
सूक्तवाचः पृथिविमातर्मा मा हिग्ंसीर्-मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि
मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासग्ंशुश्रूषेण्याम् मनुष्येभ्यस्तं
मा देवा अवंतु शोभायै पितरोऽनुमदंतु ॥
ॐ शांतिः शांतिः शांतिः ॥

|| https://www.chalisa.online ||